Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 28

No. of Printed Pages – 7

**S–71–Sanskritam (T.L.)**

यहाँ से काटिए

# माध्यमिक परीक्षा, 2020

## SECONDARY EXAMINATION, 2020

## तृतीय भाषा – संस्कृतम्

**समय** : 3¼ **(सपादहोरात्रयम्)**

**अधिकतमांका** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशा :**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

यहाँ से काटिए



Downloaded from www.cclchapter.com

1) अधोलिखितस्य पठित गद्यांशस्य हिन्दीभाषया अनुवादं लिखत – [5]

तत् श्रुत्वा कपोतराजस्य शङ्कां च अनादृत्य सर्वे कपोतास्तत्रोपविष्टाः । अनन्तरं सर्वे जालेन बद्धाः बभूवुः । ततो यस्य वचनाद् तत्र अवलम्बितास्तं सर्वे तिरस्कुर्वन्ति । तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच – ''नायमस्य दोषः । विपत्काले विस्मय एव कापुरुष लक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायोड्डीयताम् ।''

अथवा

तेन पुनः सैन्यशक्ति संग्रहकार्यम् आरब्धम्, महासैन्यं च रचयामास । तथा सेनया च मुगलशासनं प्रति स्वातन्त्र्य युद्धं प्रारभत । स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान् । तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन् । स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत् ।

2) अधोलिखितस्य पठित पद्यस्य हिन्दीभाषया अनुवादं लिखत – [5]

ते तुन्दिलाः स्वादुरसाः कलिङ्गाः

सा शारदी चञ्चलचन्द्रिका च ।

स्फूर्तिः स्फुरन्ती स्फुरगावलीषु

क्रमेलकानां गतयश्च तास्ताः ॥

अथवा

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।

तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥

3) अधोलिखित पठित पद्यस्य संस्कृतेन व्याख्यां कुरूत – [4]

विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रति पत्तये ।

शस्त्रेण रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते ॥

अथवा

अपदो दूरगामी च साक्षरो न च पण्डितः ।

अमुखः स्पष्टवक्ता च, यो जानाति स पण्डितः ॥



Downloaded from www.cclchapter.com

**4)** अधोलिखितस्य नाट्यांशस्य संस्कृतेन व्याख्या कार्या – **[3]**

प्रथमा – तथा (इति निष्क्रान्ता)

बाल: – अनेनैव तावत् क्रीडयिष्यामि। (इति तापसीं विलोक्य हसति )

तापसी – भवतु, न मामयं गणयति। (पार्श्वमवलोक्य)
कोऽत्र ऋषिकुमाराणाम्? (राजानमवलोक्य)
भद्रमुख, एहि तावत्! मोचयानेन डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्।

राजा – उपगम्य। (सस्मितम्) अयि भो महर्षिपुत्र !

अथवा

प्रथम: भिल्ल: – हा भगवन् ! अद्य कीदृश: समय: आगत:?
प्रताप: अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थित: अस्ति।

द्वितीय: भिल्ल: – न जाने अस्य मेवाड़देशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो ! परमेश्वर। त्वमपि अद्य इयान् निष्ठुर: कथं जात:।

तृतीय: भिल्ल: – हा धिक्! वराकस्य समीपे न जीवन सामग्री न च युद्ध सामग्री एव विद्यते। मातृभूमे: दुर्दशां स्वचक्षुषा कथं द्रक्ष्याम:? (रोदिति)

**5)** अधोलिखितेषु अष्टसु षण्णां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **[6 × ½ = 3]**

i) 'जयसुरभारति!' इति पाठस्य लेखक: क: अस्ति?

ii) इयं कस्य अभूमि:?

iii) प्रतापाय क: प्रभूतं धनं दत्तवान्?

iv) कुत्र त्वरणीयम्?

v) सतां विभूतय: किमर्थम्?

vi) खलस्य विवादाय का भवति?

vii) सर: सु शरत्प्रसन्नं सलिलं कदा चकास्ति?

viii) कवि: सूदनेन रचितं काव्यं किम् अस्ति?

निर्देश : – प्रश्नसंख्या 6-9 पर्यन्तं रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरूत –

**6)** संस्कारस्य अवसरे आचार्य: <u>शिष्यम्</u> उपदिशति। **[1]**

**7)** <u>सर्य:</u> तेन सह तस्यालयं गत:। **[1]**

**8)** <u>सूरजमल्लस्य</u> अपरं नाम सुजानसिंह: आसीत्। **[1]**

**9)** विद्यासमृद्धो <u>भवता</u> विधेय:। **[1]**

**10)** प्रश्नपत्रमतिरिच्य स्वपाठ्यपुस्तकात् द्वौ श्लोकौ लिखत। **[2 × 1½ = 3]**



Downloaded from www.cclchapter.com

11) अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

अस्माकं देशे षड् ऋतव: नवचेतना सञ्चरणाय समायान्ति। तत्रापि वर्षा कालं दृष्ट्वा सर्वे नन्दन्ति। अयं ग्रीष्मानन्तरं समायाति। वर्षाकाले आकाशे मेघा: आयान्ति। ते गर्जन्ति वर्षन्ति च। सौदामिन्य: स्फुरन्ति। सर्वत्र जलं भवति। वर्षाजलै: स्नाता वसुन्धरा मोदते। सर्वत्र हरीतिमा विभाति। वर्षाकाले मण्डूका: रटन्ति। मयूरा: नृत्यन्ति। वृक्षा: पल्लविता: भवन्ति। निर्झरा: मधुरं नदन्ति, नद्य: वेगेन वहन्ति। वर्षाकाले ग्रामे मार्गा: पङ्कमया: भवन्ति। जलाशया: कूपा: अपि पूर्णा: भवन्ति। कृषकाणां कृते वृष्टि: एव जीवनम् अस्ति।

क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। [1]

ख) यथानिर्देश: प्रश्नानामुत्तराणि लिखत।

i) अस्माकं देशे षड् ऋतव: किंमर्थं समायान्ति? [1]

ii) वर्षाकाले आकाशे के समायान्ति ? [1]

iii) कै: स्नाता वसुन्धरा मोदते? [1]

iv) केषां कृते वृष्टि: एव जीवनम् अस्ति? [1]

v) वर्षाकाले कुत्र मार्गा: पङ्कमया: भवन्ति? [1]

ग) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत।

i) 'वर्षाकाल: ग्रीष्मानन्तरं समायाति।' अत्र कर्तृपदं किम् अस्ति? [1]

ii) 'वर्षाकालं दृष्ट्वा सर्वे नन्दन्ति।' अत्र सर्वनामपदं किम् अस्ति? [1]

iii) 'वर्षाजलै: स्नाता वसुन्धरा मोदते।' अत्र विशेषणपदं किम् अस्ति? [1]

iv) 'वृक्षा: पल्लविता: सन्ति।' अत्र विशेष्यपदं किम् अस्ति? [1]

12) अधोलिखित पदयो: सन्धिविच्छेदं कृत्वा सन्धे: नामापि लिखत –

i) यथेच्छम् [1]

ii) प्रेजते [1]

13) अधोलिखित पदयो: सन्धिं कृत्वा सन्धे: नामापि लिखत –

i) दिक्+अम्बर: [1]

ii) राम:+हसति [1]

14) अधोलिखित रेखाङ्कित पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत –

i) <u>कृष्णकाक:</u> कोटरे वसति। [1]

ii) वने <u>धेनुपन्नगौ</u> विचरत: स्म। [1]

iii) तत् <u>जनानाम् अभाव:</u> वनम् आसीत्। [1]

15) अधोलिखित रेखाङ्कित पदेषु विभक्तिं तत् कारणञ्च लिखत –

i) <u>उदयपुरं</u> परित: जलम् अस्ति। [1]

ii) छात्र: <u>विद्यालयात्</u> बहि: गच्छति। [1]

iii) <u>दैत्येभ्य:</u> हरि: अलम् ! [1]



Downloaded from www.cclchapter.com

16) कोष्ठके प्रदत्त प्रकृति प्रत्ययाभ्यां पदं निर्माय वाक्यं पूरयत –

i) ........... नौकया नदीं तरति । (नौ+ठन्) । [1]

ii) गुरुं .......... शिष्य: सुखं लभते । (सेव्+शानच्) । [1]

17) अधोलिखित वाक्ययो: रेखाङ्कित पदयो: प्रकृतिप्रत्ययौ: पृथक् कृत्वा लिखत –

i) <u>राज्ञी</u> गुणवरा नृपस्य प्रियतमा आसीत् । [1]

ii) <u>देवता</u> स्वर्गे वसति । [1]

18) मञ्जूषायां प्रदत्तै: अव्ययपदै: रिक्तस्थानानि पूरयित्वा लिखत –

| तथा, कुत:, यत्, अपि |
|---|

i) वर्षागमे चारुमरुं विहाय क्वान्यत्र कस्य ............... रमेत चित्तम् । [1]

ii) अश्रद्धेयमेतत् ................. तृणानां वह्निना सह संगम: । [1]

iii) भवान् ............ समायात: श्रीमन् । [1]

अधोलिखित वाक्यानां वाच्य परिवर्तनं कुरूत । (प्रश्नसंख्या 19-21 पर्यन्तं)

19) सीता गीतं गायति । [1]

20) मया ग्रन्थ: पठ्यते । [1]

21) तेन सुप्यते । [1]

22) घटिका चित्र सहायतया संस्कृतेन शब्दै: रिक्तस्थाने समयलेखनं कुरूत –

क) 

ख) 

i) सायंकाले ................ विद्यालयस्य अवकाश: भवति । [1]

ii) अहं प्रात: ............ प्रातराशं करोमि । [1]

23) अधोलिखितानि वाक्यानि शुद्धानि कुरूत –

i) अहं भोजनेन कृते गृहं गमिष्यामि । [1]

ii) गुरवे अधीते । [1]

iii) स: पादात् खञ्ज: अस्ति । [1]



Downloaded from www.cclchapter.com

24) भवान् राजकीय माध्यमिक विद्यालय:, राहोली इत्यस्य दशम्या: कक्षाया: छात्र: सुरेश: अस्ति । स्वविद्यालयस्य प्रधानाध्यापकाय भ्रातु: विवाहे उपस्थातुं दिनद्वयस्य अवकाशार्थं प्रार्थनापत्रं लिखतु । [4]

अथवा

भवान् विद्यालयस्य नियमित छात्र प्रमाणपत्र प्राप्ति विषये अधोलिखित पत्रं मञ्जूषासहायतया रिक्तस्थानानि पूरयित्वा लिखतु

| |
|---|
| भवन्त:, अहं, महोदया:, मह्यं<br>प्रदाय, अत:, सेवायाम्, भागं |

...............

श्रीमन्त: प्रधानाध्यापक महोदया:,
राजकीय माध्यमिक विद्यालय:
धौलपुरम्

विषय :– नियमित छात्र प्रमाणपत्र प्राप्त्यर्थम् ।

..............

सविनयं निवेदनम् अस्ति यत् अहं विद्यालयस्य नवमकक्षाया: नियमित छात्रोऽस्मि । ................. संस्कृत श्लोक प्रतियोगितायां ............... गृहीतुम् इच्छामि । .......... प्रार्थना अस्ति यत् .......... नियमित – छात्र प्रमाणपत्रं ................ अनुगृहीष्यन्ति ............ ।

सधन्यवादम् ।

भवदाज्ञाकारी शिष्य:
रमेश :
नवमी कक्षा

25) मञ्जूषाया: उचितपदै: 'ग्रीष्मावकाश' इति विषये संवादं पूरयत – [8 × ½ = 4]

| |
|---|
| गतमासे, मया, तत्र, अतिरमणीय:,<br>त्वं, अपश्य:, अगच्छम्, कदा |

विजय: – अजय! ग्रीष्मावकाशे .................. कुत्र अगच्छ: ?
अजय: – विजय! अहं ग्रीष्मावकाशे अरुणाचलप्रदेशम् .................. ।
विजय: – अहो .................... स: प्रदेश: ।
अजय: – आम्, .............. याकपशुम् अपश्यम् ।
विजय: – किं त्वं गोम्पामन्दिरं न .......... ?
अजय: – ........... सह मम जननी जनक: च आस्ताम् । वयं सर्वे गोम्पामन्दिरम् अगच्छाम ?
विजय: – यूयं ............ तत: आगच्छत ?
अजय: – वयं ............ एव आगच्छाम ।

26) अधोलिखितेषु षड्सु वाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृतेन अनुवादं कुरूत । [4 × 1 = 4]

i) नगर के पास उपवन है।
ii) बालक को फल अच्छा लगता है।
iii) हिमालय से गङ्गा निकलती है।
iv) मैं भी गांव जाता हूँ।
v) कवियों में कालिदास श्रेष्ठ है।
vi) वृक्ष के उपर पक्षी है।



Downloaded from www.cclchapter.com

**27)** अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां सहायतया संस्कृतेन षड् वाक्यानि निर्माय लिखत – [6 × ½ = 3]

| पर्यावरणस्य, नाशयति, जलम् अपेयम्, स्वार्थाय, वृक्षकर्तनम्, पर्यावरणरक्षणम्, विविधरोगाः, वृक्षारोपणं |
|---|



अथवा

मञ्जूषायां प्रदत्त शब्दानां सहायतया रिक्तस्थानानि पूरयित्वा अनुच्छेदं लिखत –

| गत्वा, मृगेण क्लेशं भक्षणार्थम्, सिंहः प्रतिदिनम् |
|---|

i) वने एकः .............. प्रतिवसति स्म ।
ii) सः ............ अनेकान् पशून् हन्ति ।
iii) सर्वे पशवः .............. सिंहम् अवदन् ।
iv) स्वामिन् एकेत ............. अपि तव तृप्तिः भवति ।
v) अद्यप्रभृतिः प्रतिदिनम् एकः मृगः ................. आगमिष्यति ।
vi) एवं तव भोजनं ............... विना अपि भविष्यति ।

**28)** अधोलिखितवाक्यानि क्रमरहितानि सन्ति । यथाक्रमं संयोजनं कृत्वा लिखत – [6 × ½ = 3]

i) वन्यजन्तुषु तस्य आधिपत्यम् अभवत् ।
ii) सर्वे श्रृगालाः महाशब्दं कृतवन्तः ।
iii) श्रृगालः वनात् नगरम् आगतः ।
iv) श्रृगालः उत्थाय वनं प्रति पलायितः ।
v) श्रृगालः नीलीभाण्डे पतितः ।
vi) सः अन्यान् श्रृगालान् दूरं कृतवान् ।



Downloaded from www.cclchapter.com

DO NOT WRITE ANYTHING HERE

Downloaded from www.cclchapter.com